## ।। अथ अष्टमोऽध्याय: ।। Chapter-8

वसिष्ठ उवाच :-आदाय जगन्मीशां जगतामीश्वरीं नृप ।
प्रतस्थे दिवमास्थाय हरि: क्षीरोदधिं प्रति ।। १

वाताहतक्वणत्कर्म किंकिणीजालनिस्वनै: ।
विमानै: पूर्णमाकाशं गर्जद्भिरिव तोयदै : ।। २

स्थिता विमानगर्भेषु भासुरा देवपुङ्क्तय: ।
पर्यङ्केषु पयोदानां रेजिरे क्षणदा इव ।। ३

विष्वक् विधूयमानाभि श्चामरालीभिरम्बरम् ।
कादम्बकलहं सौघै: शारदीव व्यराजत ।। ४

ब्रह्मर्षीणांस्तुतिभिर्गन्धर्वाणां च गीतिभि: ।
आपूरितमिदं सर्वं भूमिर्धौर्विदिशो दिश: ।। ५

विद्युत्कोटिप्रभताब्दं लीलयैव वहन्हरि ।
अशोभत यथापूर्वमब्दो नन्दिवर्द्धन: ।। ६

उत्सर्गे विश्वरूपस्य श्री: पुपोष श्रियं तदा ।
यथा बह्वृचमन्त्रस्था पावमानी विशांपते ।। ७

इत्येवं क्रामतस्तस्य चराचरगुरोस्तदा ।
खगराजो ययौ तत्र यत्र क्षीरयम्बकं सर: ।। ८

-----

बी-१- न, २- ईबी- नि: श्वनै:, ई बी-३ दानीरै, ई(बी-४) क्षणिकादिव:, ई बी-५ शरदि, ६- ई बी स्वत, ई बी-७ प्त, बी-८ प्रभा, ई बी-९ हरि, ई बी १० पूर्वमघुदोहन विवर्द्धनं, ई बी-११ राजायातत्र:, १-ई आदायजगतामीशोनंगतामीश्वरी नृप:, २ ई माना श्चामरालिभिरब्धरं, ३-ई- कदम्ब, ४-ई तिरगन्धर्वैगीतिभि: ५- ई मथालंवृचपत्रस्य ।

-----

(ए-१) रूपस्य ।

बी१ / ए(१)

प्रेरितो थगिरीशेन देवर्षिः प्राह नारदः ।
उत्संगार्पितलक्ष्मीकं रहः श्रीवत्सलांछनं ।। ६

नारद उवाचः- परमात्मन्नमयात्मन्नमस्ते विश्वभावन ।
इयं देवी जगन्माता नात्मानं वेत्ति तत्वतः ।। १०

करोतु तदिह स्नानं त्र्यम्बकस्य जलाशये ।
मैनेयं स्नानमात्रेण शुद्ध-देहोल्लसद्युतिः ।।
हित्वा मानुष्यकं भावमात्मज्ञानमुपैयुषी ।। ११ (बी२)

वसिष्ठ उवाचः- इत्थं निशम्य गोविन्दस्तथेत्याह हर्षितम् ।
अथानिलाशनरिपुर्वैनतेयो विहंगराट् ।। १२

(बी३)(ए२)
अवतीर्याम्बरतलं गोविन्दविदिताशयः ।
विमानवृन्दानुगतः प्राप्तस्त्र्यम्बकं सरः ।। १३

ए(४)
पंचकोशप्रमाणाभूर्विमानैस्तत्र भूपते ।
आवृता परितो भाति गुणैरिव तनुः सताम् ।। १४

त्र्यम्बकं ततो दृष्ट्वा सरस्त्रैलोक्यविश्रुतं ।
पवित्रीकरणं नृणामात्मज्ञानमिवापरं ।।
साधु साध्विति गीर्वाणकोट्यो नृप तुष्टुवुः ।। १५

-----

ई(बी-१) प्रेरितोयोगरीशेन ए गिरिशेन
इ बी-२ युषि, ( बी ३) वस्तलात् ।
साधुसाध्विति गीर्वाणि कोटयोनृपतुष्टुव: ।। मन प्रह्लाद जनकं नः
शेषं कलुषापहं ।।

---

४ ए पंचकोश प्रमाणाम् विमानैस्तत्रभूपते । (ए१) गंर्पित , (ए२) तलां ।
(ए ३) भु ।

-----------

मन: प्रह्लादजनकं नि:शेषकलुषापहं ।
(ए१)
हरि: सरोवरे तत्र विजगाह सह स्त्रिया ।। १६

तदा ब्रह्मादयो देवा: सिद्धसाध्या मरुद्गणा : ।
(बी १)
शिवश्च प्रमथै: सार्द्धं चक्रु: स्नानमतन्द्रिता: ।। १७

ई इ १
अथ वै स्नानमात्रेणातस्या मानुषचेष्टितं ।
अपागमत् न्महीपाल देवत्वं चाभ्यवर्तत ।। १८

(बी २) बी ३
विश्वव्यापिनमात्मानमवबुध्य महेश्वरी ।
बी ४
हरिमात्मोद्भवं मेने ह्यात्मानं चतदुद्भवं ।।
२ ई बी ५
आत्मन्यवस्थितं विश्वमात्मा विश्वे त्ववबुध्यत ।। १९

(ए२) इ ३
मुहुर्मुहु: समुन्मज्ज्य सहदेवै: पितामहम् ।
(ए३)
हरं हरिं चं सा तत्र वीक्ष्य प्रत्यङ्मुखी स्थिता ।। २०

(ए४) बी ६ (ए ५)
अष्टौ पदान्यतिक्रम्य तिष्टन्तीं हरिवल्लभां ।
बी ७
कृतस्नाना: सुरगणा: पूजयामासुरादृता : ।। २१

(ए६)
तेजोभि: स्थगितयन्तीं रोदस्योरन्तरं तदा ।
(ए७) बी ८ बी ९
तुष्टुवुश्च मुनिश्रेष्ठा गन्धर्वाश्च जगु: कल ।। २२

(बी १०)
राजन् देवोपनीताभि दिव्यगन्धभिराद्दरात् ।
आकीर्णं: पुष्पमालाभि र्भूविभागोऽभवत्तदा ।। २३

----

ई(बी-१) नमतिंद्रता:, बी-२- द्वि, ई बी-३ रि:, बी-४ मात्मनो, बी-५ विश्वेन्यबुध्यते
२ ई विश्वं आत्मा विश्वेन्यबुध्यते, ३ इ- सहं, ई बी-६ ति, ई बी -७ वृ, बी-८ श्रेष्ट ।
९-ई बी- जग: विलं, ( बी-१०) ई द्विव्याधिभि: समावृत :, १ ई स्नानमात्रस्यकरणात् ।
१-ए प्रह्लला

----

(ए १) स्नातं द्विजगाह, (२ए) मुहुर्मज्जन्नुन्मुन्यज्य । ए३) प्रत्यंमुखी स्थिता, (ए ४) अष्टो
(ए ५) तिष्ठन्ती हरिवल्लभा, (ए६) स्थगतियन्ती (ए ७) श्रेष्टा ।

-------

अथ तत्र स्मितमुखीं निमेषोन्मिषफललोचना [बी१] ।।
बज्रासनधरां देवी [बी२] चारुकेशां चतुर्भुजां ।। २४

दक्षिणोऽमृतसम्पूर्ण [ए१] मादधानां कमण्डलुं ।।
वामे चाक्षस्त्रजं दिव्यां परयोः श्वेतपकंजे ।।

योगेश्वरी योगनिन्द्रां तुष्टुवुः सहिताः सुराः ।। २५

देवा ऊचुः -

नमो देवि महादेवि [बी४] नमस्ते विश्वभाविनि [बी३] ।।
नमस्ते जगतांमातर्नमस्ते विष्णुवल्लभे [बी५] ।। २६

त्रैलोक्यमखिलं देवि त्वमुत्पादयसे स्वतः [बी६] ।।
पासि [बी६] त्वमेव चोत्पन्नमन्ते संहरसे पुनः ।। २७

नमस्तुभ्यं सहस्त्राक्षि देवानां हितकारिणि [बी७] ।।
त्वदाधारमिदं सर्वं यथार्कं रश्मिमण्डलं [म] ।। २८

ते धन्यास्त्रिषु लोकेषु देवि येषां त्वमीश्वरी [ए२] ।।
दासत्वमपि ते मातरिन्द्रादपि [बी८] वरं पदात् [बी९] ।। २९

उत्तरारणिरेतेषां लोकानां मधुसूदनः ।।
अधरारणिरेव त्वं नान्यथा भुवनोद्भवः [र्भ] ।। ३०

---

ई बी १ नं, ई बी २ विं, ई बी ३ भाविनीः, ई बी ४ न, ई बी ५- मे, ई बी ६ स्ततः, बी७ सहस्रेपुमः, बी ८ माता रिन्द्रा, बी ९ रः,

---

( ए १) दक्षिणोमृतसम्पूर्ण ( २ ए) तुवमीश्वरि

बी १ ए १
शक्तिर्देवि परा काचिदिज्यते हृदि योगिभि: ।।
बी २
अदितिर्देवमाता त्वं देवै: स्वर्गे निषेव्यसे ।। ३१

बी ३ बी ४
स्वाहा स्वधा धृति: क्षान्ति: शांतिरिष्टा तपस्विनी ।।
म बी ५
त्वन्नूस्य जातो नाभिस्त्वदाधारमिदं जगत् ।। ३२

माता त्वं देवि लोकानां पिता देवा जनार्दन: ।।
ए २
त्वमम्बेसात्विकी शक्ती राजसी तामसी तथा ।। ३३

बी ६
त्रैगुण्येनेदमाप्नोषि निर्गुणा भासि तत्त्वत: ।।
प्रकृतिस्त्वं पुरा प्रोक्ता चेतना सर्वजन्तुषु ।। ३४

सबाह्याभ्यन्तरं प्राक्तमिदं स्थावरजंगमम् ।।
बी ७ बी ८
भृगो कुले समुत्पन्ना हिताय जगतामिह ।। ३५
बी ९ बी १० बी ११
समादिश ततो देवि ध्यानेनेप्सितमात्मन: ।।
तत्प्रसाद नाथयि वरं यच्छन्ति देवता: ।। ३६

श्री रूवाच :- वरदा यदि मे देवा वराहों यदि वाप्यहम् ।।
तदिदं श्रूयतां देवा ममाभिमतमुत्तमं ।। ३७

बी १२
विमानैर्भक्तां यद्वदियं भूमिर्विभूषिता ।।
बी १३
संघै: परिवृतां तद्वत् कर्तुमिच्छामि साम्प्रतम् ।। ३८

-----

बी १ वी, ई बी २ आदितो, ई बी ३ ति, बी ४ ति, ई बी ५- मि: त्वद ई बी ६ षिगुणा, ई बी ७ भृगोकुले ए भृगो:, ई बी ८- व, ई बी ९ ६, ई बी १० नो, ई० बी० ११-न, बी १२ म, ई बी १२ संघे ।

---

( ए १) हृदि

( ए २) त्वमम्बेसात्विकी

अऋषयो महात्मानो नानागोत्रास्तपस्विनः ।।
सह पत्नीभिरायान्तु पुत्रैः शिष्यैः समावृताः ।। ३९

इमां भूमिं प्रदास्यामि ब्राह्मणेभ्यः समाहिता ।।
अत्रांशेन ममैवास्तु निवासः शाश्वती: समाः ।। ४०

श्री भगवानुवाचः- त्वं देवि परमा शक्तिः सर्वदेवेष्ववस्थिता ।।
यदिच्छसि कुरु क्षिप्रं कस्ते दातुं वरं क्षमः ।। ४१

इत्याख्याय चतुर्बाहुरवोचत गणान् बहून् ।।
भो भोः प्रयान्तु त्वरितं दिशः सर्वास्वतन्द्रिताः ।। ४२

ये केचिन्मुनयः सन्ति तेषां पुत्रा यशस्विनः ।।
सर्वे देवव्रतस्नाताः कृतोद्वाहाः प्रियेक्षिणः ।।
युवानो दर्शनीयाश्च तानानयतमां चिरम् ।। ४३

पुण्यशैलेषु तीर्थेषु ये केचिन्निकरेषु च ।।
नदीषु नदकूलेषु देवखातेषु किंचन ।। ४४

देवाश्रयेषु ये केचिदाश्रमेषु वनेषु च ।।
पुण्यक्षेत्रेषु रम्येषु ग्रामेषु नगरेषु च ।।
तानानयंतु सम्पूज्य ऋषिपुत्रान् सुवर्च्चसः ।। ४५

----

ई बी १ वृतं, ई बी २ अत्रां, ई बी ३ नमैवास्तु, बी ४ साश्वती, ई बी ५, तेकेचित्मु, ई बी ६ हा, ई बी ७ यतमाचिरं, ई बी ८ देवा, बी ९ षुवनेषु
( ए १) चिर
( ए २ ) समपूज्य

आरोप्याशु विमानेषु शुभेषु जवनेषु च ।।
देवी हरिप्रिया लक्ष्मी युष्मभ्यं दास्यते मही ।।
वाञ्छितानि च रत्नानि धनानि च निवेद्यताम् ।। ४६

वसिष्ठ उवाच :- इत्यादिष्टा गणश्रेष्ठाः प्रणिपत्य जनार्दनम् ।।
यथादिष्टं गताः सर्वे समानेतुं द्विजर्षभान् ।। ४७

गतेष्वथ गणौघेषु शंखचक्रगदाधरः ।।
विश्वकर्माणमाहूय प्रोवाचेदं वचस्तदा ।। ४८

भगवानुवाच :- अत्र सौधानि दिव्यानि कुरु त्वं प्रमतन्द्रितः ।।
मुमुक्षूणामपि यथा हरन्ति प्रसभं मनः ।। ४९

विश्वकर्मोवाच :- यथादिशति देवो मामित्यालप्य कृतांजलिः ।।
विदधे सौधसम्बद्धं नगरं तत्र विश्वकृत् ।। ५०

---

इति श्री स्कंदपुराणे एकाशीति साहस्त्र्यां संहितायां ब्राह्म्य-विभागे तृतीय परिच्छेदे श्रीमाल महात्म्ये आत्मप्रबोधो नाम अष्टमोऽध्यायः ।। ८ ।।

---

१ ई आरोप्या, ई बी १, याने, ई बी २ हि, बी २ गतं, ई बी ४ प्रमतंद्रतः, २ ई यथो
( ए १) अरोप्य, ( ह २) लक्ष्मी , ( ए ३) जनार्दन ( ए ४) सम्बद्धं